"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः ॥")

वितंसः, पुं, ( वि+तंस+घञ् । ) वीतंसः । मृग-पक्षिणां बन्धनोपकरणम् । इत्यमरटीकायां भरतः ॥

वितण्डा, स्त्री, ( वितण्ड्यते विहन्यते परपक्षोऽनयेति । वि+तण्ड+गुरोश्चेत्यः । टाप् । ) स्वपक्षास्थापना परपक्षव्युदासः । इत्यमर-भरतौ ॥ ( यथा, महाभारते । २ । ३६ । ३ ।
"एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा ।
इत्युपबृंहवस्तत्र वितण्डां वै परस्परम् ॥")
कच्वीशाकः । शिलाह्वयः । करवीरी । इति मेदिनी । डे, ३६ ॥ दर्व्वी । इति हारावली ॥

विततं, त्रि, ( वि+तन्+क्तः । ) विस्तृतम् । ( यथा, प्रबोधचन्द्रोदये । ३ । ५ ।
"उद्गायन्ति यशांसि यस्य विततैर्नादैः प्रचण्डा-निल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्तै रणाग्रौ
भयः ॥" )
वीणादिवाद्यम् । इत्यमरे ततशब्दार्थदर्शनात् ॥

विततिः, स्त्री, विस्तारः । विपूर्व्वतनधातोः क्तिप्रत्ययेन निष्पन्ना ॥ ( यथा, भागवते । ६।१०।१५ ।
"बध्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥")

वितथं, त्रि, मिथ्या । इत्यमरः ॥ ( यथा, मनुः । ८ । ६४ ।
"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं
व्रजेत् ।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये ॥"
निष्फलः । व्यर्थः । यथा, भागवते । ६।२०।३५ ।
"तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥"
पुं, भरद्वाजपुत्त्रः । स च दौष्मन्तेर्भरतस्य पौत्त्रः । यथा, हरिवंशे । ३२ । १८—१६ ।
"ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत् ।
पौत्त्रेऽथ वितथे जाते भरतस्तु दिवं ययौ ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ ॥")

वितथ्यं, त्रि, असत्यम् । वितथशब्दात् स्वार्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

वितद्रुः, स्त्री, (वितनोतीति । वि+तन+"जत्वा-दयश्च ।" उणा० ४ । १०२ । इति रुप्रत्ययेन साधुः । ) नदीविशेषः । सा च पञ्जावाख्यदेशे वर्त्तते । इत्युणादिकोषः ॥

वितरणं, क्ली, ( वि+तॄ+भावे ल्युट् । ) दानम् । इत्यमरः ॥ ( यथाह कश्चित् ।
"वित्तेन किं वितरणं यदि नास्ति तस्य ॥")

वितर्कः, पुं, ( वि+तर्क+घञ् । ) ऊहः । (यथा, भागवते । १० । ८६ । १ ।
"सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत ।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥")
संशयः । इति मेदिनी । के, १५७ ॥ ( यथा, महाभारते । १ । १६० । २३ ।
"यौ तौ कुमाराविव कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः ॥")
ज्ञानसूचकः । इति शब्दरत्नावली ॥ * ॥ आहो उताहो किमुत किं किमु उत एते षट् विकल्पवितर्कार्थे । यथा स्थाणुराहो पुरुषः । इति अहो इत्यादि च । विकल्पे विस्मयेऽप्यहो इति रुद्रः । किमु इत्यान्तं उत इत्यादि । चकारात् उताहोस्वित् आहोस्विदिति च यथा भारते । "उताहोस्विद्भवेद्राजा नलः परपुरञ्जयः ।" इति आहोस्विन्मुखमिति भारवौ । इति भरतः ॥

वितर्कणं, क्ली, ( वि+तर्क+ल्युट् । ) वितर्कः । इति शब्दरत्नावली ॥

वित(र्द्दि)र्द्दिः, स्त्री, (वि+तर्द्द हिंसायाम्+"सर्व्व-धातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ) वेदिका । इत्यमरः ॥ ( यथा, माघे ।३।५५।
"रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्य्यूहविटङ्कनीडः ॥" )

वित(र्द्दि)र्द्दिका, स्त्री, ( वितर्द्दिरेव । स्वार्थे कन् । ) वेदिका । इति शब्दरत्नावली ॥ ( यथा, राज-तरङ्गिण्याम् । ८ । २६८५ ।
"क्षेमराजाभिधानेन डामरेणैष सोऽन्वितः ।
शिलां वितर्द्दिकातुल्यामध्यास्त स्वप्रमध्यगाम् ॥")

वितर्द्दी, स्त्री, (वितर्द्दि+कृदिकारादिति ङीष् । ) वेदिका । इति शब्दरत्नावली ॥

वितर्द्दी, स्त्री, वेदिका । इत्यमरटीकायां भरतः ।

वितलं, क्ली, ( विशेषेण तलम् । ) पातालभेदः ॥ यथा,—
"अतलं नितलञ्चैव वितलञ्च गभस्तिमत् ।
तलं सुतलपाताले पाताला हि तु सप्त वै ॥"
इति शब्दरत्नावली ॥
(अस्य विवरणं यथा, देवीभागवते । ८ । १६ । ८—१२ ।
"द्वितीयविवरस्यात्र वितलस्य निबोधत ।
भूतलाधस्तले चैव वितले भगवान् भवः ॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः ।
प्रजापतिकृतस्यापि सर्गस्य वृंहणाय च ॥
भवान्या मिथुनीभूय आस्ते देवाधिपूजितः ।
भवयोर्वीर्य्यसंभूता हाटकी सरिदुत्तमा ॥
समिद्धो मरुता वह्निरोजसा पिबतीव हि ।
तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं दैत्यवल्लभम् ॥
दैत्याङ्गनाभूषणार्थं सदा सन्धारयन्ति हि ॥")

वितस्तिः, पुं स्त्री, ( वि+तसु उपक्षेपे+"वौ तसेः ।" उणा० ४ । १८१ । इति तिः । ) विस्तृतसकनिष्ठाङ्गुष्ठः । विगत् इति भाषा ॥ तत्पर्य्यायः । द्वादशाङ्गुलः २ । इत्यमरः ॥ (यथा, मार्कण्डेये । ४६ । ३६ ।
"द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम् ॥")

वितानं, क्ली, (वितन्यते यत् । वि+तन+घञ् । ) वृत्तिविशेषः । इति मेदिनी । ने, १३१ ॥ अवसरः । इति विश्वः ॥

वितानः, पुं क्ली, ( वि+तन्+घञ् । ) क्रतुः । ( यथा, माघे । १४ । १० ।
"सोमपायिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना ॥")
विस्तारः । ( यथा, भागवते । ३ । ७ । ३१ ।
"यज्ञस्य च वितानानि योगस्य च पथः प्रभो ।
नैष्कर्म्म्यस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-
स्मृतम् ॥")
उल्लोचः । इत्यमरः ॥ चाँदोया इति भाषा । अस्य पर्य्यायश्चन्द्रातपशब्दे द्रष्टव्यः ॥ ( यथा, रघुः । १७ । २८ ।
"वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥"
समूहः । यथा, माघे । ११ । ४३ ।
"नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम् ॥"
व्रणबन्धनविशेषः । यथा, सुश्रुते । १ । १८ ।
"तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डल-स्थगिकायमकखट्टाचीनविबन्धवितानगोफणाः पञ्चाङ्गी चेति चतुर्द्दशबन्धविशेषाः ॥" )

वितानः, त्रि, ( वि+तन+घञ् । ) तुच्छः । ( यथा, रघुः । ६ । ५० ।
"गगनमश्वखुरोद्धतरेणुभि-
र्नृसविता च वितानमिवाकरोत् ॥")
मन्दः । इत्यमरः ॥ शून्यः । इति धरणिः ॥ ( यथा, माघे । ३ । ५० ।
"दृहत्तुलैरप्यतुलैर्वितान-
मालापिनद्धैरपि चावितानैः ॥")

वितानकः, पुं क्ली, ( वितान एव । स्वार्थे कन् । ) चन्द्रातपः । इति शब्दमाला ॥ ( यथा, कथा-सरित्सागरे । ४८ । ६६ ।
"तदा तैर्मुक्तमन्योन्यं बाणजालं बभौ दिवि ।
रणलक्ष्म्या तपत्यर्के वितानकमिवाततम् ॥"
समूहः । यथा, माघे । ६ । २७ ।
"अनुययौ विविधोपलकुण्डल-
द्युतिवितानकसंवलितांशुकम् ॥")

वितानकः, पुं, ( वितान इव प्रतिकृतिः । वितान+कन् । ) माड़हृक्षः । इति राजनिर्घण्टः ॥

वितानमूलकं, क्ली, (वितानतुल्यं मूलं यस्य । बहु-व्रीहौ कन् ।) उशीरम् । इति राजनिर्घण्टः ॥

वितुन्नं, क्ली, ( वि+तुद+क्तः । ) सुनिषण्णकम् ; इत्यमरः ॥ शैवालकम् । इति मेदिनी । ने, १३१ ॥

वितुन्नकं, क्ली, ( वितुन्नमिव । इवार्थे कन् । ) धान्यकम् । तुत्थम् । इत्यमरः ॥

वितुन्नकः, पुं, आमलकी । इत्यमरः ॥

वितुन्ना, स्त्री, भूम्यामलकी । इति राजनिर्घण्टः ॥

वितुन्निका, स्त्री, ( वितुन्ना+स्वार्थे कन् । टापि अत इत्वम् । ) भूम्यामलकी । इति राज-निर्घण्टः ॥

वित्त, त क त्यागे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-पर०-सक०-सेट् । ) वित्तयति । वित्ता-पयति । इति दुर्गादासः ॥